**NKT/KS/17/6048**

**Bachelor of Arts (B.A.) Part—I First Semester Examination**

**SANSKRIT**

**Optional Paper–1**

**(Literature)**

समय:— होरात्रयम्]　　　　　　　　　　　　　　　　[पूर्णांका:— 80

**सूचना** :— विशेषनिर्देशाभावे स्वीकृतमाध्यमेन उत्तराणि लिखत।

**(नीतिशतकम्)**

1. **अज्ञपद्धति**मनुसृत्य मूर्खस्य लक्षणानि लिखत। 10

**अथवा**

**विद्वत्पद्धति**मनुसृत्य विद्वत्महिमा वर्णयत।

2. **वाक्यद्वयस्य** ससन्दर्भं स्पष्टीकरणं लिखत। 10

(1) विवेकभ्रष्टानां भवति विनिपात: रातमुख:

(2) विद्याविहीन: पशु:

(3) सेवाधर्म: परमगहन:

(4) वाग्भूषणं भूषणम्।

3. (अ) श्लोक**द्वयस्य** सप्रकरणम् अनुवादं कुरूत : 10

(1) श्रोत्रं श्रुतेनैव न तु कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन
विभाति काय: करुणापराणां
परोपकारेण न तु चन्दनेन।।

(2) जाडयं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति
चेत: प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगति कथय किं न करोति पुंसाम्।।

(3) दाक्षिव्यं स्वजने, दया परजने शाठयं जने दुर्जने।
प्रीति: साधुजने स्मय खळजने विद्वज्जने चार्जवम्।
शौर्यं शत्रुजने क्षमा गुरूजने नारीजने धूर्तता
ये चैवं पुरूषा: कलासु कुशलास्तेषेव लोकस्थिति:।।

(4) आरम्भगुर्वी क्षयिणी क्रमेण
लध्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खल-सज्जनानाम्।।

(ब) उपरिनिर्दिष्टेषु श्लोकेषु कमपि **एकं वृत्तं** अभिज्ञाय तस्य सलक्षणं स्पष्टीकरणं लिखत। 5

(क) निम्नलिखितं **एकं वृत्तं** सोदाहरणं सलक्षणं च स्पष्टीकुरूत :

(1) वंशस्थ

**अथवा**

(2) मालिनी। 5

**(रामायणम्)**

4. रामायणस्य **साहित्यिकं अथवा राजनैतिकं** महत्वं लिखत। 10

5. (अ) अधोनिर्दिष्टेषु पर्यायेषु वस्तुनिष्ठप्रश्नानाम् उत्तराणि लिखत : 5

(1) ख्रिस्तपूर्वं __________ शतके महर्षीवाल्मीकिना रामायणं रचितम्। (अष्टम, सप्तम, पञ्चम)

(2) रामस्य __________ इति रामायणम्। (भ्रमणं, अयनम् मानसम्)

(3) __________ इति रामायणस्य अपरं नाम। (पौळत्स्यवधम्, चतुर्विंशतिसाहस्त्री संहिता, रामचरितम्)

(4) रामायणे __________ काण्डानि सन्ति। (षट्, सप्त, अष्ट)

(5) रामायणस्य __________ संस्करणानि प्रसिद्धानि (पञ्च, चत्वारि, अष्ट).

(ब) निम्नलिखितानां पदानाम् अनुरूपं योजयत : 5

| अ | ब |
|---|---|
| (1) बालकाण्डम् | (क) रामसुग्रीवमैत्री |
| (2) अरण्यकाण्डम् | (ख) सीतास्वयंवर: |
| (3) अयोध्याकाण्डम् | (ग) सीताहरणम् |
| (4) युद्धकाण्डम् | (घ) वनवासगमनम् |
| (5) किष्किन्धाकाण्डम् | (ङ) रावणवधम् |

**(पुष्पमाला-व्याकरणम्)**

6. (अ) सुयोग्यं पर्यायं दत्वा रिक्तस्थानानिं पुरयत : 5

(1) सा आकाशात् __________ नारदं अपरयत्। (अवतरन्तं, अवतरता, अवतरन्)

(2) मण्डूक: __________ चकार। (चेतस्, चेतस:, चेतसि)

(3) __________ विना प्रवास: दुष्कर: भवति। (आरक्षणं, आरक्षणे आरक्षणेन)

(4) दक्षः __________ अद्रुहयत् (श्रीशिवम्, श्रीशिवाय, श्रीशिवे)

(5) __________ उद्विग्नाः हिप्पीजनाः अपि अत्र स्वैरं अटन्ति। (संसारे, संसारात्, संसारं).

(ब) सूचनानुसारेण वाक्यपरिवर्तनं कुरूत : 5

(1) कथं अहं धनं लभे ? (द्वितीय भविष्यकालः)

(2) शंकर मनसि अचिन्तयत् (कर्णारि भूतकाल धासा. वि.)

(3) रामः वनं अगच्छत् (परोक्ष भूतकालः)

(4) मात्रा स्वोदरं अल्पम् (उत् + फुल्) उक्तम्। (पूर्वकालवाचक ल्यबन्त अव्यय)

(5) सा सपद्येव रजसि (पत्) पञ्चत्वं गता। (पूर्वकालवाचक त्वान्त अव्यय)

(क) **त्रयाणां समास विग्रहं** कृत्वा नामनिर्देशनं कुरूत : 3

(1) रामलक्ष्मणौ

(2) लतागीतानि

(3) अधर्मः

(4) भारतीयभाषा

(5) अनुगीतम्।

(ड) **त्रयाणां** विग्रहं कुरूत : 3

(1) महादाश्चर्यम्

(2) कोऽपि

(3) पुनश्च

(4) विषधरस्योपरि

(5) दृष्टिपथमुपयाति।

(ई) निम्नलिखितं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि **संस्कृत्तभाषया** लिखत : 4

संस्कृतं संस्कृतेर्मूळम्। भारतीयसंस्कृतेः मूलाधारः संस्कृतं। 'व्यासोच्छिष्टं जगत्सर्वम्' इति वचनानुसारेण सर्वेषां शास्त्राणां मूलभूततत्वानां विचारोऽपि संस्कृतसाहित्ये दृश्यते। मानव्यशास्त्रं-वाणिज्यशास्त्रं तथा च विज्ञानविषयकं ज्ञानमपि संस्कृतसाहित्यद्वारा ज्ञातुं शभ्यते। अतः आधुनिककाले दिल्लीनगरस्था 'संस्कृतभारती' नाम्नी संस्था संस्कृतप्रचारार्थं कटिबद्धा अस्ति।

(1) किम् संस्कृतेर्मूलम् ?

(2) संस्कृतं कस्य मूलाधारः ?

(3) संस्कृतसाहित्ये कस्य विचारः दृश्यते ?

(4) का संस्था संस्कृतप्रचारार्थं कटिबद्धा अस्ति ?